*SB-0228/12000*

# SB-0228

## Third Year B. A. Examination

**March / April – 2011**

## Sanskrit : Paper - V

*(Principal)*

*(दर्शनशास्त्र – अनुवादः)*

(१) ब्रह्मसूत्रशाङ्करभाष्य – चतुः सूत्री – १,२,३

(२) सांख्यकारिका – ईश्वरकृष्णः। (३) तर्कभाषा – केशवमिश्रः ।

(४) अपठितः अनुवादः ।

Time : 3 Hours] [Total Marks : **70**

**सूचना :**

નીચે દર્શાવેલ ☛ નિશાનીવાળી વિગતો ઉત્તરવહી પર અવશ્ય લખવી.
**Fillup strictly the details of ☛ signs on your answer book.**

Name of the Examination :
☛ **Third Year B. A**

Name of the Subject :
☛ **Sanskrit : Paper - V (Principal)**

☛ Subject Code No. : **0 2 2 8** ☛ Section No. (1, 2,.....) : **Nil**

Seat No. :

Student's Signature

१ (અ) કોઈપણ એક સૂત્ર શાંકરભાષ્ય અનુસાર સમજાવો. ५

1 (a) Explain any one Sutra according to शांकरभाष्यम् । **5**

(१) जन्माद्यस्ययतः ।

(२) अथातो ब्रह्मजिज्ञासा ।

(બ) નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડના વિચારો સ્પષ્ટ કરો : १०

(b) Explain the ideas in any **two** of the following paragraphs : **10**

(१) तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते; तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः । तत्रैव सति यत्र यदध्यासः, तत्कृतेन दोषेन गुणेन वाऽणुमात्रेणापि स न संबध्यते, तमेतमविद्याख्यमात्मानात्मानात्मनोरितरेताध्यासं पुरस्कृत्य सर्वे प्रमाण प्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः । सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ।

(२) नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसंपत्, मुमुक्षुत्वं च । तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये । तस्माद् अथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते ।

(३) किमु वक्तव्यमनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोर्ऋग्वेदा–द्याख्यस्य सर्वज्ञानाकारस्या प्रयत्नेनैव लीलान्यायेन पुरुषनिः श्वासवद्यस्मान्महतो भूताद्योनेः संभवः 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृह. २–४–१०) इत्यादिश्रुतेः । तस्यो महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति । इति प्रथमवर्णकम् ।

(४) 'भृगुर्वै वारुणिः वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' इत्यपक्रम्याह – 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्ब्रह्मेति' (तैत्ति. ३–१) । तस्य च निर्णयवाक्यम् – आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति' (तैत्ति. ०३–६) । अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञ स्वरूपकारण विषयाण्युदाहर्तव्यानि ।

૨ કોઈપણ **બે** ટૂંકનોંધ લખો : ૧૦

2 Write short note on any **two** : **10**

(१) षड्भावविकाराः ।

(२) सूत्र–भाष्य–अधिकरणम् ।

(३) त्रिविधसत्ता ।

(४) अन्यथाख्याति ।

૩ (અ) નીચેનામાંથી કોઈપણ **બે** કારિકાઓ સમજાવો : ૮

3 (a) Explain any **two** of the following Karikas : 8

(१) दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥

(२) उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात् ।
गुणपरिणामविशेषा नानात्वं बाह्यभेदाश्च ॥

(३) तन्मात्राण्यविशेषां तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ता धोराश्च मूढाश्च ॥

(४) चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया ।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥

૩ (બ) 'સત્કાર્યવાદ'ના પ્રતિપાદન માટેની દલીલો સમજાવો. ૧૨

3 (b) Explain in detail the arguments in support of Satkaryavada. 8

**અથવા / OR**

૩ (બ) નોંધ લખો :

3 (b) Write Note :

(૧) दुःखत्रयः ।

(२) अष्टसिद्धिः ।

૪ (અ) નીચેનામાંથી **બે** વિધાનો સમજાવો : ૬

4 (a) Explain any **two** of the following : 6

(૧) तच्च कारणं त्रिविधम् । समयवाच्यसमवायिनिमित्त भेदात् ।

(२) लिङ्गपरामर्शोऽनुमानम् ।

(३) तथाहि अनुमानस्य द्वे अङ्गे व्याप्तिः पक्षधर्मता च ।

(४) तथा हि पीनो देवदत्तो दिवा न भुङ्क्ते इति
दष्टे श्रुते वा रात्रिभोजन कल्प्यते ।

૪ (બ) તર્કભાષાના આધારે પ્રત્યક્ષપ્રમાણ વિષે સવિસ્તર ચર્ચા કરો. ૯

4 (b) Discuss in detail the प्रत्यक्ष प्रमाण according to तर्कभाषा. 9

**અથવા / OR**

૪ (બ) નોંધ લખો : ૯

4 (b) Write Note : 9

(૧) शब्दप्रमाणः ।

(२) अभावप्रमाणः ।

૫ નીચેનામાંથી કોઈપણ **એક**નો અનુવાદ કરો : ૧૦

**5** Translate any **one** of the following : **10**

(१) नहुषनामो चन्द्रवंश्यो भूपो बभूव । आत्मन्ः सर्वाः प्रजाः स्वाः प्रजा इव पालयन् स शतमखमेघानाजहार । स यज्ञफलरूपं देवराज्यं प्राप । अनेन मदान्धः स सप्तर्षीन् स्वां शिविकां वाहयामास । एकदा नहुषः शच्या महालयं गन्तुं प्रतस्थे । वामनेनागस्त्येन मुनिना प्रांशुभिरन्यैर्मुनिभिश्चोह्यमाना शिविका भृशं चकम्पे। इमं कम्पमसहमाने। नहुषो वामनमगत्स्यं 'सर्प सर्प' इत्युक्त्वा त्वरयामास । संजातकोपो मुनिः 'सर्पो भव' इति तं शाप ।

(२) श्रोतं श्रुतेनैव न तु कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां,
परोपकारेण न तु चन्दनेन ॥ १ ॥
पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः ॥ २ ॥
अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय पर पीडनम् ॥ ३ ॥